STOTRADHWANI

# सुन्दरकाण्ड पञ्चविंशः सर्गः (२५) - ॥ सीतानिर्वेदः ॥

तथा तासां वदन्तीनां परुषं दारुणं बहु ।
राक्षसीना मसौम्यानां रुरोद जनकात्मजा ॥ १ ॥

एवमुक्ता तु वैदेही राक्षसीभिर् मनस्विनी ।
उवाच परम त्रस्ता बाष्प गद्गदया गिरा ॥ २ ॥

न मानुषी राक्षसस्य भार्या भवितु मर्हति ।
कामं खादत मां सर्वा न करिष्यामि वो वचः ॥ ३ ॥

सा राक्षसी मध्यगता सीता सुर सुतोपमा ।
न शर्म लेभे दुःखार्ता रावणेन च तर्जिता ॥ ४ ॥

वेपते स्माधिकं सीता विशन्ती वाङ्ग मात्मनः ।
वने यूथ परिभ्रष्टा मृगी कोकै रिवार्दिता ॥ ५ ॥

सा त्वशोकस्य विपुलां शाखा मालम्ब्य पुष्पिताम् ।
चिन्तयामास शोकेन भर्तारं भग्न मानसा ॥ ६ ॥

सा स्नापयन्ती विपुलौ स्तनौ नेत्र जलस्रवैः ।
चिन्तयन्ती न शोकस्य तदाऽन्त मधिगच्छति ॥ ७ ॥

सा वेपमाना पतिता प्रवाते कदली यथा ।
राक्षसीनां भयत्रस्ता विवर्ण वदनाऽभवत् ॥ ८ ॥

तस्याः सा दीर्घ विपुला वेपन्त्या सीतया तदा ।
ददृशे कम्पिनी वेणी व्यालीव परिसर्पती ॥ ९ ॥

सा निःश्वसन्ती दुःखार्ता शोकोपहत चेतना ।
आर्ता व्यसृजद श्रूणि मैथिली विललाप ह ॥ १० ॥

हा रामेति च दुःखार्ता हा पुनर् लक्ष्मणेति च ।
हा श्वश्रु मम कौसल्ये हा सुमित्रेति भामिनी ॥ ११ ॥

लोकप्रवादः सत्योऽयं पण्डितैः समुदाहृतः ।
अकाले दुर्लभो मृत्युः स्त्रिया वा पुरुषस्य वा ॥ १२ ॥

यत्राह मेवं क्रूराभी राक्षसीभि रिहार्दिता ।
जीवामि हीना रामेण मुहूर्त मपि दुःखिता ॥ १३ ॥

एषाल्प पुण्या कृपणा विनशिष्याम् यनाथवत् ।
समुद्र मध्ये नौः पूर्णा वायुवेगै रिवाहता ॥ १४ ॥

भर्तारं तम पश्यन्ती राक्षसी वशमागता ।
सीदामि खलु शोकेन कूलं तोयहतं यथा ॥ १५ ॥

तं पद्मदल पत्राक्षं सिंह विक्रान्त गामिनम् ।
धन्याः पश्यन्ति मे नाथं कृतज्ञं प्रियवादिनम् ॥ १६ ॥

सर्वथा तेन हीनाया रामेण विदितात्मना ।
तीक्ष्णं विष मिवास्वाद्य दुर्लभं मम जीवितम् ॥ १७ ॥

कीदृशं तु मया पापं पुरा जन्मान्तरे कृतम् ।
येनेदं प्राप्यते दुःखं मया घोरं सुदारुणम् ॥ १८ ॥

जीवितं त्यक्तु मिच्छामि शोकेन महता वृता ।
राक्षसीभिश्च रक्ष्यन्त्या रामो नासाद्यते मया ॥ १९ ॥

धिगस्तु खलु मानुष्यं धिगस्तु परवश्यताम् ।
न शक्यं यत् परित्यक्तु मात्मच् छन्देन जीवितम् ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥